# अष्टमः पाठः

# मदनमोहन मालवीयः

## (मदनमोहन मालवीय)

*[मदनमोहन मालवीय की गणना वर्तमान भारत के महापुरुषों में की जाती है। गाँधीजी उन्हें महामना मालवीय कहा करते थे। मालवीय जी जीवन-पर्यन्त देश की स्वतन्त्रता के लिए संघर्षरत् रहे। काशी हिन्दू विश्वविद्यालय उनका कीर्ति-स्तम्भ है।]*

गौरं कान्तिमयं वपुः, धवलं परिधानं, गले लम्बितमुत्तरीयं, शिरसि धवलोष्णीषम्, ललाटे कुङ्कुमगर्भित-धवलचन्दनतिलकं, धवले चोपानहौ एतत्सर्वं मदनमोहन मालवीयस्य भारतीयचारित्र्यं हृदयस्य च विमलत्वं निदर्शयन्ति स्म। वस्तुतस्तु, भारतीय संस्कृतिस्तस्मिन् रूपायिता जाता।

पण्डितमदनमोहनमालवीयस्य जन्म एकषष्टयुत्तराष्टादशशततमे ख्रिष्टाब्दे दिसम्बरमासस्य पञ्चविंशति दिनाङ्के (25-12-1861) तीर्थराज प्रयागे एकस्मिन् ब्राह्मणकुलेऽभवत्। अस्य जनकः पण्डितव्रजनाथचतुर्वेदः संस्कृतभाषायाः विश्रुतो विद्वानासीत्। निर्धनोऽपि धर्मकर्मणि सततरतोऽयं विद्वान् समाजे समादृत आसीत्। एतस्य पूर्वजा मालवदेशादागत्योत्तरभारते न्यवसन्नतस्ते 'मालवीय' इति पदेन सम्बोध्या अभवन्।

मदनमोहनमालवीयस्य प्रारम्भिकी शिक्षा प्रयागे एवैकस्यां संस्कृतपाठशालायां जाता। संस्कृताध्ययनेन बाल्य एव तस्य मनसि भारतीयादर्शचरितानां कृते भारतीयसंस्कृतेश्च कृते बह्वादरः समजायत। स्मृतिपुराणमहाभारत-भागवतादिभारतीयग्रन्थानामनुशीलनेन भारतदेशं प्रति तस्य हृदि श्रद्धा समुत्पन्ना। दुःखतप्तानां प्राणिनामर्तिनाशनं स कामयते स्म। अतः बाल्यकाले एव तस्य हृदि देशभक्तेः मानवसेवायाः मानवजीवनस्याभ्युदयस्य बीजान्युप्तानि जातानि यानि काले विकसितभूतानि फलितानि। कालान्तरे सः प्रयागे प्रथमसंस्थापिते राजकीय हाईस्कूल नाम्नि विद्यालये पठन् 'इन्ट्रेन्स' परीक्षामुदतरत्। ततः म्योर सेन्ट्रल कालेजेऽधीयानः बी० ए० परीक्षायाः पारं गतः। अग्रे पठितुमिच्छन्तमप्यर्थकार्श्यं तमबाधत। कर्त्तव्यसंघाते किं पूर्वं करणीयमिति विशिष्टकर्त्तव्यनिर्धारणमेव विवेकशालिनां वैशिष्ट्यम्। अतः जीवननिर्वाहार्थं तेनाध्यापनवृत्तिः स्वीकृता। तदैव कलिकातानगरे अखिलभारतीयकांग्रेसदलस्य अधिवेशनमभूत्। मालवीयमहोदयस्तत्र गतः। व्यवस्थापिकासभाविषयमवलम्ब्यातीव गम्भीरं विचारपूर्णं भाषणं चाकरोत्। पञ्चविंशतिवर्षीयस्य यूनः मालवीयस्य मनोहारिण्या शैल्या विशदविचारान् संसृत्य नेतार इतरे चोपस्थिता जनाः देशसेवकाश्च चकिता अभवन्। एकेनैव भाषाणेनासौ राष्ट्रञ्चस्थानां नेतृणां पङ्क्तौ स्वमुपावेशयत्। तस्याध्ययनस्य तस्य सदाशयतादिगुणानां तस्य च विनयस्येदं प्रतिफलमासीत्। तत्रैव प्रतापगढस्थकालाकाँकरस्य देशभक्तो राजारामपालसिंहस्तस्य वैशिष्ट्येनाकृष्टः 'हिन्दुस्तान' दैनिकपत्रस्य सम्पादनायानुरोधं कृतवान्।

'हिन्दुस्तान' पत्रस्य सम्पादनं कुर्वता मालवीयमहोदयेन तदानीम् आङ्गलशासकैराक्रान्ते देशे चाङ्गलभाषायाऽऽक्रान्तायां शिक्षायां राष्ट्रियभावस्य हिन्दी-भाषायाश्च दृढतया प्रचारः कृतः। हिन्दुस्तानपत्रमतिरिच्येतरेषामनेकपत्राणामपि सम्पादनं तेन कृतम् परं सर्वत्र राष्ट्रसेवा हिन्दी भाषासेवा च तस्य मुख्यलक्ष्ये आस्ताम्। न्यायालयेषु हिन्दीभाषायाः प्रयोगनिर्णये मालवीयमहोदयस्य विशिष्टमवदानं विद्यते।

पत्राणां सम्पादनावसरे प्रकटिता अस्य विचाराः सुस्पष्टा, गम्भीरा, युक्तियुक्ताश्चाभवन्। अतः विरोधिनोऽपि तं प्रशंसन्ति स्म। आङ्ग्लशासनस्यालोचनां कुर्वन् मालवीयमहोदयो न भयमनुभूतवान् नाऽपि संकोचं कृतवान्। न दैन्यं, न पलायनमिति तस्य जीवनसूत्रमासीत्। पत्रसम्पादनकर्मणि तस्य मनो नारमत। गुरुजनानां परामर्शमनुसृत्यासौ एल-एल०बी० कक्षायां पठितुमारब्धवान् स-सम्मानं च तां परीक्षामुदतरत्। एल-एल० बी० पदव्या विभूषितः सन् प्रयागस्थोच्चन्यायालये अधिवक्तृकर्म कर्तुं प्रारभत। स्वल्पैरेवाहोभिः न्यायालये न्यायक्षेत्रे च परां ख्यातिमवाप। मृषावादानसौ न स्वीकरोति स्म, अतः सत्यं प्रति तस्य दृढो विश्वासः अधिवक्तृकर्मनिरतानां कृतेऽद्यापि आदर्शभूतः संतिष्ठते।

मदनमोहनमालवीयोऽध्यापकोऽभवत्, पत्रकारकर्म चानुष्ठितवान् परं स: सन्तुष्टिं शान्तिं च नालभत। देशस्य पारतन्त्र्येण तस्य मन: भृशमदूयत। कथं वा देश: पारतन्त्र्यशृङ्खलामुच्छिद्य स्वतन्त्रो भविष्यतीति चिन्ताचिन्तित: सन् मालवीय: अखिलभारतीयकांग्रेसदलमाध्यमेन पृथग्रूपेण मातृभूमे: मुक्तिकर्मणि संलग्नो जात:। स्वकार्येण स्वविचारेण चासौ कांग्रेसदलस्य त्रिवारं सभापतिपदमलङ्कृतवान्। हिमगिरिमिव तस्योत्तुङ्गं मनो दृष्ट्वा महात्मा गान्धी तं 'महामना' इत्यवोचत्। एकत्रिंशदुत्तरैकोनविंशतिशततमे वर्षे (1931) आङ्ग्लशासकै: सह सन्धिवार्तां कर्तुं महात्मना गान्धिना सह अयमपि इंग्लैण्ड-देशं जगाम। आङ्ग्लभाषायां व्यक्तान् तस्य विचारान् संश्रुत्य इंगलैण्डवासिन: अपि मुग्धा अभवन्।

राष्ट्रसेवाकर्मणि निरतोऽपि महामना मालवीयोऽन्येष्वपि रचनात्मककर्मसु प्रवृत्त आसीत्। प्रयागे जनान् धनं याचित्वा मैक्डॉनलहिन्दूछात्रावासस्य निर्माणमसौ अकारयत्। तस्यैवोद्योगेन प्रयागस्य प्रख्यातस्य मिण्टोपार्क इत्यस्यापि निर्माणं जातम्। समग्रे च देशे शिक्षाया: ह्रासदशामवलोक्याशिक्षैवास्माकं पारतन्त्र्यस्य हेतुरिति सोऽमन्यत। अतो देशस्योन्नत्यै क्रियमाणैरन्यैरुद्योगै: सह शिक्षाया: विकासायापि प्रयत्नो विधेय इति तस्य दृढा मतिरासीत्। सततं चिन्तयन् स: काशीहिन्दूविश्वविद्यालयस्य संस्थापनाया: संकल्पं हृदि निदधौ। षोडशोत्तरैकोनविंशतिशततमे वर्षे (1916) वसन्तपञ्चमीपर्वदिने काश्यां पुण्यसलिलाया: गङ्गायास्तटे लोकोत्तरमिदं कार्यं संवृत्तम्। भिक्षावृत्त्या जनान्, श्रेष्ठिनो, राज्ञो, महाराजान्, वैदेशिकशासनमपि धनं याचित्वा विश्वविद्यालयस्य संस्थापनं तस्यापूर्वमनोबलस्य संकल्पदृढतायाश्च द्योतकं वर्तते। पञ्चक्रोशपरिमिते क्षेत्रेऽभिव्याप्ते विश्वविद्यालयपरिसरे निर्मितानि विविधविद्या-महाविद्यालयभवनानि दृष्ट्वा कस्य वा भारतीयस्य मनो नाऽह्लादते को वा वैदेशिको विस्मितो न जायते। इयति विस्तृत भूखण्डे कस्यचिदपि विश्वविद्यालयस्य जगति स्थिति: न श्रूयते।

अस्मिन् विश्वविद्यालयेऽध्ययनरताश्छात्रा: वैदेशिकभाषा-विज्ञान-कला-कौशलप्रभृतिविषयेषु निष्णाता: सन्त: भारतीयां संस्कृतिं धर्मदर्शनमितिहासं च न विस्मरेयुरिति तस्य प्रयासोऽभूत्। अतोऽध्यापनावसरे भारतीयाचारान् स छात्रानशिक्षयत्। विभिन्नपर्वावसरेषु च भारतस्य प्राणभूतभागवतमहापुराणस्य कथां सुललितभाषया मधुरेण च स्वरेण छात्रान् प्राध्यापकांश्चाश्रावयत्। विविधविषयज्ञानसम्पादनसममेव छात्रा: भारतीयाचारविचारेण च परिचितास्तिष्ठेयुरिति तस्य लक्ष्यमासीत्। स भारतीयस्वातन्त्र्यमपि भारतीयतामधिकृत्यैव भवेदिति कामयते स्म। स: पूर्णभारतीय आसीत्।

विश्वविद्यालयस्य स कुलपतिपदमपि अलङ्कृतवान्। कुलपतिपदमलंकुर्वन् स छात्रान् प्रियपुत्रानिवामन्यत। अर्थसंकटे देहसंकटे वा ग्रस्त: कश्चित् छात्र इति ज्ञात्वा तस्य संकटमचिरमसौ पितृवदपानयत् कुलपतिस्तु स पदेनासीत् व्यवहारेण च कुलपिता अभवत्।

काशीहिन्दूविश्वविद्यालयस्य विकासाय सततं प्रयत्नरतोऽपि मालवीयमहोदय: देशस्यासहायजनानां महान्तंक्लेशं दर्शं दर्शं परम: खिन्नो अभवत्। भारतस्याखण्डताया: तस्यैकत्वस्य च निदर्शनं विश्वविद्यालयरूपेण तेन पुर:कृतम्। तन्निमित्तं तेन गुरु: प्रयासो विहित:। चत्वारिंशदुत्तरैकोनविंशतिशततमे वर्षे (1944) साम्प्रदायिको झञ्झावात: समुत्थित:। देशस्यानेकेषु भागेषु प्रज्वलित: साम्प्रदायिकताग्नि: भारतस्य सांस्कृतिकं प्रासादं भस्मसादकरोत्। ब्रिटिशशासनप्रयुक्तकुटिलनयेनोत्थितो झञ्झावातो मालवीयमहोदयस्य मन:स्थित भारतस्य चित्रं विकृतमकरोत्। कुटिलराजनीतिमुग्धा धर्मम्प्रति भ्रान्ता: नेतारो यथा ताण्डवमरचयन् तत्स्मृत्वाऽद्यपि हृदयं प्रकामं प्रकम्पते। सहस्रश: प्राणास्तदनलेहुता:। सहस्रशो जना गृहहीना: जाता:। लक्षाधिका: शरणार्थिनोऽभवन्। मालवीयमहोदयस्य चित्तमतर्क्यं तद्दु:खं सोढुं नाशक्नोत्। विश्वविद्यालयस्थे कुलपतिभवने स प्राणानत्यजत्। मालवीयमहोदयस्य विपुलं यश: विश्वविद्यालयरूपेण जगति शाश्वतं स्थास्यति।

# काठिन्य निवारण

**वपु:** = शरीर। **धवलं** = सफेद। **परिधानं** = वस्त्र। **लम्बितम्** = लटका हुआ। **उत्तरीयं** = दुशाला। **उष्णीषम्** = पगड़ी। **ललाटे** = मस्तक पर। **विमलत्वम्** = निर्मलता को। **उपानहौ** = जूते। **निदर्शयति स्म** = प्रकट करते थे। **रूपायिता** = साकार। **विश्रुतो** = प्रसिद्ध। **समादृत** = सम्मानित। **आर्तिनाशनम्** = दु:खों का नाश। **उप्तानि** = बोये गये। **वृत्ति:** = जीविका। **अर्थकार्श्यं** = धन की कमी। **यून:** = युवकों का। **कुर्वता** = करते हुए। **अतिरिच्येत** = अतिरिक्त। **अवदानम्** = योगदान। **अधिवक्तृकर्म** = वकालत। **ख्यातिमवाप** = यश प्राप्त किया। **मृषावादानसौ** = इन्होंने

झूठ बोलना। **निरतः** = लगा हुआ। **निदधौ** = रख लिया। **इयति** = इतने। **निष्णाताः** = चतुर। **अश्रावयत्** = सुनाते थे। **अचिरम्** = शीघ्र। **प्रासादं** = महल को। **अनले** = अग्नि में। **विहितः** = किया। **समुत्थितः** = उठ खड़ा हुआ। **हुताः** = आहुति दिये गये। **विपुलं** = विशाल।

# अभ्यास प्रश्न

1. 'मदनमोहन मालवीयः' पाठ का सारांश हिन्दी में लिखिए। **(2018HR, HT, 19AP, 20MO, MT, MU)**
2. निम्नलिखित गद्यावतरणों का ससन्दर्भ हिन्दी में अनुवाद कीजिए–
   (क) गौरं.................................................जाता।
   (ख) पण्डितमदनमोहन..................................आसीत्।
   (ग) 'हिन्दुस्तान' पत्रस्य..............................आस्ताम्।
   (घ) अस्मिन्.......................................कामयते स्म।
   (ङ) अस्मिन्........................................लक्ष्यमासीत्।
   (च) कुटिलराजनीति..............................प्राणानत्यजत्।
   (छ) विश्वविद्यालयस्य......................कुलपिता अभवत्।
   (ज) मदनमोहनमालवीयोऽध्यापको......................'महामना' इत्यवोचत्। **(2019AS)**
3. निम्नलिखित प्रश्नों के उत्तर हिन्दी में लिखिए–
   (क) महामना मदनमोहन मालवीय के द्वारा स्थापित विश्वविद्यालय का नाम एवं स्थान लिखिए।
   (ख) मालवीय जी की जीवन-शैली कैसी थी?
   (ग) महामना मालवीय जी ने देश के हित में सबसे बड़ा कार्य क्या किया?
   (घ) मदनमोहन मालवीय का जीवन-परिचय दीजिए।
   (ङ) मालवीय जी को 'महामना' सर्वप्रथम किसने कहा?
   (च) काशी हिन्दू विश्वविद्यालय के प्रथम कुलपति कौन थे?
   (छ) मालवीय जी के रचनात्मक कार्य का उल्लेख कीजिए।
   (ज) मालवीय जी के दो महत्त्वपूर्ण कार्यों का उल्लेख कीजिए।
   (झ) काशी हिन्दू विश्वविद्यालय की स्थापना कब हुई?
   (ञ) मालवीय जी द्वारा सम्पादित समाचार-पत्र का नाम लिखिए।
   (ट) 'मदनमोहन मालवीयः' पाठ का सारांश लिखिए।
   (ठ) 'मदनमोहन मालवीयः' पाठ के आधार पर 'मालवीय' का चरित्र-चित्रण लिखिए।
4. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए–
   (क) मदनमोहन मालवीयस्य जन्म कदा अभवत्?
   (ख) मदनमोहन मालवीयस्य जन्म कुत्र अभवत्?
   (ग) मदनमोहन मालवीयस्य जनकः कः आसीत्?
   (घ) मदनमोहन मालवीयस्य प्रारम्भिकी शिक्षा कुत्र अभवत्?
   (ङ) काशी हिन्दू विश्वविद्यालयः केन संस्थापितः?
5. अस् धातु के रूप विधिलिङ् के तीनों वचनों और पुरुषों में लिखिए।
6. निम्नलिखित शब्दों का प्रयोग संस्कृत-वाक्यों में कीजिए–
   सः, अभवन्, देशस्य, तस्य, सह, कालान्तरे।

## ➨ आन्तरिक मूल्यांकन

मालवीय जी द्वारा देश के लिए किये गये योगदानों की एक सूची तैयार कीजिए। ●